**संस्कृतवार्ता:**

**दिनाङ्क :-14.09.2025**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री मणिपुर- मिजोरम - असम यात्रा</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना गतदिने मिजोरम, मणिपुर, असम राज्यानां यात्रा कृता। प्रधानमन्त्रिणा नरेन्द्रमोदिना मणिपुर-प्रदेशीय युवजनाः अध्यर्थिताः यत् ते शान्त्या-प्रगति-कल्याण-पथि अग्रे सरेयुः। गतदिने श्री मोदिना मणिपुरे चूडाचाँदपुर-जनपदे जनसभा अपि संबोधिता। तत्र श्री मोदिना त्रिशदुत्तर-सप्त-सहस्राधिक-कोटि रुप्याकत्मिकानां चतुदर्श-विविध-विकास- परियोजनानाम् आधारिशला अपि स्थापिता। प्रधानमन्त्रिणा मणिपुरे विकासाय शांतिः सर्वोपरि वर्तते इत्यपि भणितम्। सर्वैः संघटनैः आग्रहः कृतः यत् बालकानां सुरक्षित-भविष्यार्थं शान्ति-पथि चलनस्य महती आवश्यकता वर्तते।

एतासु विकास-परियोजनासु मणिपुर-नागर-मार्गाः, सौविध्य परियोजनाः, पञ्च-राष्ट्रिय-राजमार्गीय-परियोजनाः, मणिपुर-संचरनात्मक-विकास-परियोजनाः, महिला-आवासीय भवनानि, बहवश्च अन्य-परियोजनाः समाविष्टाः सन्ति।

प्रधानमन्त्रिणा नरेन्द्रमोदिना मिजोरम-प्रदेशे आइजोल-राजधान्यां आभासीय -माध्यमेन रेल-मार्ग समेत्य नव-सहस्राधिक-कौट्यधिक बहवः विकास-परियोजनाः शुभारम्भिताः। एताः परियोजनाः विविध-क्षेत्रेभ्यः सम्पृक्ताः सन्ति, यथा- रेल-मार्ग, ऊर्जा, क्रीडा इत्यादयः। श्रीमोदिना अष्ट-सहस्र-कौट्यधिक रुप्यकात्मिका बैरबी- सैरांग-नूतन- रल-मार्गः उद्घाटितः। एषः मार्गः मिजोरमस्य राजधानीं प्रथम-वारं भारतीय-रेल-नेटवर्क-इत्यनेन साकं योजयिष्यति। अवसरेऽस्मिन् प्रधानमन्त्रिणा प्रतिपादितं यत् भारत-देशः विश्वस्य सर्वाधिक द्रुतगामि अर्थव्यवस्था विद्यते। पूर्वोत्तर-देशश्च विकासस्य वाहको विद्यते। तेन एतदपि भणितं यत् प्रशासनं एक्ट-ईस्ट-नीतिः पूर्वोत्तर-आर्थिक-वीथ्यां एकां प्रमुख भूमिकां निभालयति।

**<u>प्रधानमन्त्री-नेपालः</u>**

भारतेन नेपालदेशे सुशीला-कार्की इत्यस्याः नेतृत्वे सुगठितस्य अन्तरिम-सर्वकारस्य स्वागतं विहितम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना एकस्मिन् सोशल-मीडियासन्देशे सुशीला-कार्की इत्यस्यै अन्तरिम-सर्वकारस्य प्रधानमन्त्रीत्वेन पदभार-ग्रहणाय स्वीयाः शुभेच्छाः प्रकटिताः। अत्रान्तरे नेपालस्य राष्ट्रपतिः रामचन्द्र-पौडेलः अन्तरिम-प्रधानमन्त्रिणः प्रार्थनामङ्गीकृत्य प्रतिनिधि-सभाञ्च प्रभज्य अग्रिम-वर्षस्य मार्चमासस्य पञ्चम-दिनाङ्के नव-संसदीय-निर्वाचनानां घोषणाम् अकरोत्।

**<u>वैष्णोदेवी-तीर्थयात्रा-स्थगिता</u>**

जम्मू-काश्मीरे कतिपयदिनानि यावत् स्थगिता श्रीमाता-वैष्णोदेवी-तीर्थयात्रा अद्य पुनः आरभ्यते इति सुनिश्चितम् आसीत्, किन्तु रियासी-जनपदे अविरतवृष्ट्या यात्रा प्रत्यग्रं आदेशं यावत् स्थगिता ।

**<u>भारतीय ऋतुविज्ञानविभागः</u>**

भारतीय ऋतुविज्ञानविभागेन आगामिषु द्वित्रिदिवसेषु देशस्य पूर्वोत्तरभागेषु अतिवृष्टेः पूर्वानुमानं प्रकटितम्। विभागेन उक्तं यत् ओडिशा, महाराष्ट्र, तटीय-आन्ध्रप्रदेशः, यनम, छत्तीसगढ, तेलङ्गाणा, महाराष्ट्र इत्येतेषु राज्येषु अस्य मासस्य पंचदश दिनाङ्कपर्यन्तं अतिवृष्टिः भविष्यति। अद्य तावत् असम, मेघालय, बिहार, छत्तीसगढ, मध्यप्रदेश, हिमाचलप्रदेश, कोङ्कण, गोवा, महाराष्ट्र, उत्तर-आन्तरिक-कर्नाटक, उत्तर-पञ्जाब इत्येतेषु राज्येषु अपि प्रचण्डवृष्टिः भवितुम् अर्हति।

**<u>टेनिस क्रीडा</u>**

टेनिसक्रीडायां भारतीयदलेन स्विसटेनिसक्षेत्रे बील इत्यत्र गतदिवसे डेविस् कप् प्रथमस्पर्धायां स्विट्ज़र्लण्डदलं त्रिणी - एकम् इति अंकान्तरालेन पराजित्य आगामिवर्षस्य अर्हतास्पर्धायां स्थानं अवाप्तम् ।

**<u>संस्कृत-साप्ताहिकी</u>**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। कृपया श्रृण्वन्तु।